काम्ये येनापि । एवञ्च सर्व्वाविरोधे सुवर्णादिपात्रेणाप्याचमनं कार्य्यं स्वयमसामर्थ्येऽन्येनाचमनं कारयितव्यम् । याज्ञवल्क्यः ।

"अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनवुद्वुदैः ।
हृत्कण्ठतालुगाभिस्तु यथासंख्यं द्विजातयः ॥
शुध्येरन् स्त्री च शूद्रश्च सकृत् स्पृष्टाभिरन्ततः ॥"

अन्ततः ओष्ठोपान्ते । उत्तरोत्तरमपकर्षात् । अतएव स्पृष्टाभिरित्युक्तं न तु भक्षिताभिरिति । स्त्री शूद्रो वाथ नित्याम्भः चालनाच्च करोष्ठयोः इति ब्रह्मपुराणाच्च । आचमनार्थे पाणिपादप्रक्षालनमेवेत्येके । इति शूद्राधिकारे गोतमोक्तेश्च । आचमनार्हजलाभावे इदमित्याचाराध्यायः । मनुः ।

"हृद्गाभिः पूयते विप्रः कण्ठगाभिश्च भूमिपः ।
वैश्योऽद्भिः प्राशिताभिश्च शूद्रः स्पृष्टाभिरन्ततः ॥"

अत्र वर्षावधिप्राशनमुक्तम् अनुपनीतानान्तु स्त्रीशूद्रवदाचमनं न यावदुपनीयेत । इति प्रागुक्तशौचे तथादर्शनात् । मिताक्षरादयोऽप्येवम् । अम्बु विशेषयति बौधायनः । पादप्रक्षालनाच्छेषेण नाचामेत यद्याचामेत् भूमौ स्रावयित्वाचामेदिति । उशनाः ।

"कांस्यायसेन पात्रेण त्रपुसीसकपित्तलैः ।
आचान्तः शतकृत्वोऽपि न कदाचिच्छुचिर्भवेत् ॥"

कांस्यादिपात्रकरणकाचमनं कांस्यायसेनेत्यादिना निषिद्धमिति केचित् । हस्तेनाचमनेऽपि कांस्यादिपात्रावर्ज्जितं तन्निषिद्धमित्यपरे । आचमनजलनिषेधे शङ्खलिखितौ । न शूद्राशुच्येकपाण्या वर्ज्जितेनेति अत्राशुचिपदम् आचमनकर्त्तृभिन्नपरम् । शूद्रसाहचर्य्यात् एकपाणिपदमपि आचमनकर्त्तृभिन्नपाणिपरम् । तेन स्वीयवामपाण्यावर्ज्जितमनिषिद्धम् । तथा च कमण्डल्वधिकारे बौधायनः । मूत्रपुरीषे कुर्व्वन् दक्षिणहस्तेन गृह्णाति सव्येनाचमनीयमिति । गृह्णाति जलपात्रमिति शेषः । आचामेदित्यनुवृत्तौ देवलः ।

"शिखां बद्ध्वा वसित्वा द्वे निर्णिक्ते वाससी शुभे ।
तूष्णीं भूत्वा समादाय नोद्गच्छन्नविलोकयन् ॥"

एकवस्त्रः प्राचीनावीति न इत्यादिपारस्करदर्शनात् यत्र प्रेतस्नानतर्पणादौ एकवस्त्रत्वं विहितं तत्र तदङ्गत्वादेकवासा एवाचमनं कुर्य्यात् । प्रचेताः ।

"अनुष्णाभिरफेनाभिः पूताभिर्वीक्ष्य चक्षुषा ।
हृद्गताभिरशब्दाभिस्त्रिश्चतुर्वाद्भिराचमेत् ॥"

चतुर्वेति भावशुद्ध्यपेक्षया विकल्पः । न तु फलभूयस्त्वार्थं कल्पनागौरवापत्तेः । वीक्षणानुष्णयोर्भट्टभाष्यमाधवाचार्य्यकृतपराशरभाष्ययोरपवादमाह यमः ।

"रात्राववीक्षितेनापि शुद्धिरुक्ता मनीषिभिः ।
उदके नातुराणाञ्च तथोष्णे नोष्णपायिनाम् ॥"

आचामेदित्यनुवृत्तौ वशिष्ठः । प्रदरादपि या गोस्तर्पणाय स्युर्न वर्णरसदुष्टाभिर्याश्च स्युरशुभागमा इति । प्रदरो विदीर्णभूभागः । अशुभागमाः अशुचिदेशादागताः । यस्मिन् देशे वर्णादिदुष्टमेव तोयं तत्र तदपि ग्राह्यम् । तथा च मरीचिः ।

"येषु स्थानेषु यच्छौचं धर्म्माचारश्च यादृशः ।
तत्र तत्रावमन्येत धर्म्मस्तत्रैव तादृशः ॥
येषु स्थानेषु ये देवा येषु देशेषु ये द्विजाः ।
येषु स्थानेषु यत्तोयं या च यत्रैव मृत्तिका ॥"

आचमने उदकग्रहणप्रकारं परिमाणञ्चाह भरद्वाजः ।

"आयतं पर्व्वणां कृत्वा गोकर्णाकृतिवत् करम् ।
संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः ॥
मुक्ताङ्गुष्ठकनिष्ठाभ्यां शेषेणाचमनञ्चरेत् ।
माषमज्जनमात्रास्तु संगृह्य त्रिः पिबेदपः ॥"

पाणिना दक्षिणेन । त्रिः पिबेद्दक्षिणेनापि इत्यादिपुराणोक्तेः । मार्कण्डेयः ।

"सपवित्रेण हस्तेन कुर्य्यादाचमनक्रियाम् ।
नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्ज्जयेत् ॥"

मदनपारिजाते हारीतः ।

"ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनञ्चरेत् ॥"

यत्नादग्रन्थिरिति समुद्रकरेऽपि । आचमनानुवृत्तौ देवलः ।

"न गच्छन्न शयानश्च न चलन्न परान् स्पृशन् ।
न हसन्नैव संजल्पन्नात्मानञ्चैव वीक्षयन् ॥"

चलन् कम्पमान इति रत्नाकरः ॥ आत्मानं आत्मस्थानं हृदयम् । वीक्षयन्निति स्वार्थे णिच् ।

"केशान्नीवीमधःकायं न स्पृशन् धरणीमपि ।
यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करम् ॥"

अधःकायं नाभेरधःप्रदेशम् । करं दक्षिणम् । आचमनानुवृत्तौ गोभिलः ।

"नान्तरीयैकदेशेन कल्पयित्वोत्तरीयकम् ॥"

अन्तरीयमधःपरिधानं तदेकदेशमुत्तरीयं कृत्वा मरीचिः ।

"न वहिर्जानुस्त्वरया नाशनस्थो न चोत्थितः ।
न पादुकास्थोऽन्यचितः शुचिः प्रयतमानसः ॥
उपस्पृश्य द्विजो नित्यं शुद्धः पूतो भवेन्नरः ।
भुक्तासनस्थो नाचामेन्नान्यकाले कदाचन ॥"

जलस्थलोभयकर्म्मानुष्ठानार्थन्तु जलस्थलैकचरणेनाचमनं कर्त्तव्यमित्याह पैठीनसिः । अन्तरुदके आचान्तोऽन्तरेव शुद्धः स्यात् तस्मादन्तरेकं वहिरेकञ्च कृत्वा पादमाचरेत् सर्व्वत्र शुद्धो भवतीति । जले नूत्तिष्ठन्नाचामेत् । जानोरूर्द्ध्वं जले तिष्ठन्नाचान्तः शुचितामियात् । अधस्तात् शतकृत्वोऽपि समाचान्तो न शुध्यतीति विष्णूक्तेः । हारीतः ।

"आर्द्रवासा जले कुर्य्यात्तर्पणाचमनं जपम् ।
शुष्कवासाः स्थले कुर्य्यात्तर्पणाचमनं जपम् ॥"

कात्यायनः ।

"स्नानमाचमनं होमं भोजनं देवतार्च्चनम् ।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम् ॥
आसनारूढ़पादस्तु जानुनोर्जङ्घयोस्तथा ।
कृतावसक्थिको यस्तु प्रौढ़पादः स उच्यते ॥"

आसनारूढ़पादः आसनारोपितपादतलः । जानुनोर्जङ्घयोः कृतावसक्थिको वस्त्रादिना कृतपृष्ठजानुजङ्घाबन्धः । तद्द्वयेन भेदप्रतीतेः प्रौढ़पादस्य द्विविधत्वं प्रतीयते ॥*॥ अत्र च अनेकोद्वाह्ये दारुशिले भूमिसमे इष्टकाश्च सङ्कीर्णीभूता इति बौधायनवचनात्तथाविधे आरूढ़पादोऽपि कुर्य्यात् । व्यासः ।

"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा ।
अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत् ॥"

तथा ।

"अपः पाणिनखाग्रेण आचामेद्यस्तु ब्राह्मणः ।
सुरापानेन तत्तुल्यमित्येवमृषिरब्रवीत् ॥"

संवृत्येति मुखं संवृत्य अलोमकोष्ठस्पर्शो यथा न भवतीति तात्पर्य्यम् । तथा च वशिष्ठः ।

"आचान्तः पुनराचामेद्वासो विपरिधाय च ।
ओष्ठौ च संस्पृश्य तथा यत्र स्यातामलोमकौ ॥"

एवञ्च प्रागुक्तहारीतवचने ओष्ठयोर्म्मार्ज्जनमुक्तं तत् सलोमकयोरेवेति । एतदनन्तरं वामहस्तं पादौ शिरश्च दक्षिणेन पाणिनाभ्युक्षयेत् । तथा च कामधेनावापस्तम्बः । त्रिराचामेत् हृद्गाभिस्त्रिरोष्ठौ परिमृजेत् द्विरित्येके दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेति । गोभिलः । त्रिराचामेत् द्विः परिमृजीत पादावभ्युक्ष्य शिरोऽभ्युक्षयेदिति इन्द्रियाण्यद्भिः । स्पृशेत् अक्षिणी नासिके कर्णाविति । इन्द्रियाणि इन्द्रियायतनानि इन्द्रियाणाममूर्त्तत्वात् तिसृभिरिति तर्ज्जनीमध्यमानामिकाभिः ॥*॥ सर्व्वत्राङ्गुष्ठयोगेन आचमनकारणमाह पैठीनसिः । अग्निरङ्गुष्ठस्तस्मात्तेनापि सर्व्वाणि स्थानानि स्पृशेत् । निष्ठीवनादावाचमनं यथा । वायुपुराणे ।

"निष्ठीवने तथाभ्यङ्गे तथा पादावसेचने ।
उच्छिष्टस्य च सम्भाषादशुच्युपहतस्य च ॥
सन्देहेषु च सर्व्वेषु शिखां मुक्त्वा तथैव च ।
विना यज्ञोपवीतेन नित्यमेव उपस्पृशेत् ॥
उष्ट्रवायससंस्पर्शे दर्शने चान्त्यवासिनाम् ॥"

हारीतः ।

"स्त्रीशूद्रोच्छिष्टसंभाषणे मूत्रपुरीषोत्सर्गदर्शने देवमर्भिगन्तुकाम आचामेदिति ।" याज्ञवल्क्यः

"स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे ।
आचान्तः पुनराचामेद्वासो विपरिधाय च ॥"

ब्रह्मपुराणे ।

"होमे भोजनकाले च सन्ध्ययोरुभयोरपि ।
आचान्तः पुनराचामेदन्यत्रापि सकृत् सकृत् ॥
द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम् ॥"

स्मृतिः ।

"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने ।
कर्म्मस्थं एषु नाचामेत् दक्षिणं श्रवणं स्पृशेत् ॥"